'तिङ्ङतिङः' (८ . १ . २७/३९३५) इति निघाते कृतेऽनुदात्ते पदादावेकादेशः। स्वरितग्रहणं [1]विस्पष्टार्थम्। उदात्ते हि विकल्पिते तस्मिन्नसत्यान्तर्यत एव स्वरितो भविष्यति इति। अनुदात्ते इति किम्? देवदत्तोऽत्र। पदादौ इति किम्? वृक्षौ। वृक्षाः[2] ॥

## नलोपः प्रातिपदिकान्तस्य। (७/३८३)

[3]पदस्य इति वर्तते। प्रातिपदिकस्य पदस्य योऽन्त्यो नकारः तस्य लोपो भवति। राजा। राजभ्याम्। राजभिः। [4]राजता। राजतरः। राजतमः। [5]प्रातिपदिकग्रहणं किम्? अहन्नहिम्। अन्तग्रहणं किम्? राजानौ। राजानः। प्रातिपदिकग्रहणमसमस्तमेव सुपां सुलुक् (७.१.३९/३५२१) इति [6]षष्ठया लुका निर्दिष्टम्।

[९०९] अह्नो नलोपप्रतिषेधो वक्तव्यः। (म. भा. ३. ३९४)

अहः। अहोभ्याम्। अहोभिः। 'रोऽसुपि' (८. २. ६९/१७२), 'अहन्' (८. २. ६८/४४३) [7]इति रेफरुत्वयोरसिद्धत्वात् नलोपः प्राप्नोति, सावकाशं तदुभयं सम्बुद्धौ, हेऽहः, हे दीर्घाहो निदाघेति? [8]तत्र समाधिमाहुः। अहन् इति [9]रुविधौ यदुपादीयते प्रथमैकवचनान्तमकृतनलोपं तदावर्त्यते, तत्र एकया आवृत्त्या तदेवं रूपं नलोपाभावार्थम् अन्वाख्यायते, द्वितीययापि तस्य रुः विधीयते[10] ॥

## न ङिसम्बुद्ध्योः। (८/३८२)

[11]ङौ परतः सम्बुद्धौ च नकारलोपो न भवति। '[12]आर्द्रे चर्मन्' (तै. ७. ५. ९३)। 'लोहिते चर्मन्' (काठ. २४. २)। सुपां लुक् (७.१.३९/३५६१) इति [13]ङेर्लुक्। सम्बुद्धौ – हे राजन्। हे तक्षन्। [14]एतस्मादेव नलोपप्रतिषेधवचनात् अप्रत्ययः (१. २. ४५/२७८) इति प्रत्ययलक्षणेन प्रातिपदिकसञ्ज्ञा न प्रतिषिध्यते इति ज्ञाप्यते, [15]भसञ्ज्ञा च न भवति इति। तथा च राज्ञः पुरुषः राजपुरुषः इत्यत्र नलोपश्च भवति, अल्लोपश्च न भवति।

[९१०] ङावुत्तरपदे [16]प्रतिषेधस्य प्रतिषेधो वक्तव्यः। (म.भा. ३ . ३९४)

चर्मणि तिला अस्य चर्मतिलः[17]। हे राजन् वृन्दारक इत्यत्र [18]समुदायार्थसम्बोधनम्, न पूर्व[19]पदार्थसम्बोधनं प्रतीयते इति सम्बुद्ध्यन्तं पूर्वपदं नैव समस्यते।

[९११] वा नपुंसकानामिति वक्तव्यम्। (म.भा. ३. ३९५)

हे चर्मन्, हे चर्म ॥

---

1. तु इत्यधिकम् इ. 2. वृक्षैः प्लक्षैः इत्यधिकम् ब. 3. वाक्यमिदं नास्ति ब.क.ह. 4. राजत्वम् ह. ड. 5. इमे द्वे वाक्ये न स्तः ह. 6. षष्ठीलुका ब, षष्ठचा लुका निर्देशः क, षष्ठ्यालुकादिनिर्दिष्टम् ह. 7. इति नास्ति क. 8. केचिदाहुः क.ह. 9. रुविधौ नास्ति ब. 10. इति इत्यधिकम् ब.क.ह. 11. पूर्वेण प्रवृत्तो नलोपः अतिदिश्यते इत्यधिकम् ड. 12. ङौ इत्यधिकम् ड. 13. विभक्तेर्लुक् क. 14. अस्मादेव ब.ड. 15. पदसञ्ज्ञा ड. 16. प्रतिषेधस्य नास्ति ब. ह. 17. अध्वनि विद्धः अध्वविद्धः। सामनि शौण्डः सामशौण्डः इत्यधिकम् ड. 18. समुदायार्थः समुच्चयार्थः इ. 19. पूर्वपदार्थः क.ब.ड.